न षत्वम् । कुत्सितच्छेदके तद्गणे किसेति पाठान्तरम् पृषो० अनुस्वारलोपः । तदर्थे

**किंसखि** पु०कः कुत् सनः सखा किमःक्षेपार्थत्वात् न टच्समा०। कुत्सिते सख्यौ "स किंसखा साधु न शास्ति योऽधिपम्" किरा०प्रश्नार्थे किमः टच्समा०। किंसखइत्येव ।

**किंस्वित्** अव्य० द्वन्द्वः । वितर्के गणर० स्थाणुरयं किंस्वित् पुरुषः । स्थाणुत्वपुरुषत्वाभ्यां वितर्कोऽत्र गम्यते ।

**किकि** पु० कक इन् पृषो० इत्त्वम् । १नारिकेले राजनि० । किकीतिशब्दकारके २चाषपक्षिणि (स्वर्ण चातक) शब्दमा०।

**किकिदिव** पु० किकीत्यव्यक्तशब्देन दीव्यति दिव—क । चाषपक्षिणि । इन् । किकिदिविरप्यत्र शब्दमा० ।

**किकिन्** पु०किकीतिशब्दोऽस्त्यस्य वीह्या० इनि । काषपक्षिणि किकीदिविरिति पदद्वयम् अमरव्याख्याने क्षीरस्वामी।

**किकिर** स्त्रि० कृ—घञर्थे कर्म्मणि क वेदे पृषो० आदौ कयागमः । कोशे "आविश्य किकिरा क्रणु पत्नीनाम्" ऋ०६'५३'७' "किकिरा कोशानि" भा० सुपां सुलुगित्यादिना आच् । एतेन किकिराशब्दकल्पनं चिन्त्यम् ।

**किकीदि(दी)वि** पु० किकीतिशब्देन दीव्यति दिव—इन् उणा०सू०किकीदिवीति निर्देशात् नि०दीर्घः । चाषे सि० कौ० अत्र पूर्व्वोत्तरपदयोर्ह्रस्वदीर्घविनिमये किकिदीविरित्यपि तत्रैव सि० कौ० । "सार्कं यच्छ प्रपत चाषेण किकिदीविना" ऋ०१०,९७,१३ ।

**किक्किट** त्रि० कुत्सिते । "किक्किटाकारेण ग्राम्याः पशवोभवन्ति" तैत्ति० स०

**किक्किश** पु०सुश्रुतोक्ते दैहिके क्रमिभेदे ।"केशरोमनखादाश्च दन्तादाः किक्किशास्तथा" क्रमिशब्दे विवृतिः

**किक्किसाद** पु० "राजिमन्तस्तु" इत्युपक्रमे "गोधूमकः किक्किसाद इति सुश्रुतोक्ते सर्पभेदे । सर्पशब्दे विवृतिः

**किखि** पु०स्त्री० (ख्याँक शेयालि) शृगालभेदे त्रिका०

**किङ्कणी** स्त्री किञ्चित्कणति कण—शब्दे इन् ङीप् । क्षुद्रघण्टिकायां हेमच०

**किङ्कर** त्रि० किञ्चित् करोति अच् । १दासे सेवके स्त्रियान्तु टाप् । किङ्करस्य पत्नी ङीष् । २किङ्करी दासपत्न्याम् स्त्री "अवेहि मां किङ्करमष्टमूर्त्तेः" रघुः । "विप्रस्य किङ्करो भूपो वैश्योभूपस्य भूमिप ! । सर्वेषां किङ्करः शूद्रो ब्राह्मणस्य विशेषतः" पुरा० । किङ्करस्य गोत्रापत्यं नडा० फक् । कैङ्करायण तद्गोत्रापत्ये पुंस्त्री ।

**किङ्कल** पु०सात्वतवंश्ये नृपभेदे ।"भजमानस्य निम्लोचिः किङ्कलोमुष्टिरेव च" भाग०९,२४,५, नडादौ किङ्कलेति वा पाठः ततो गोत्रापत्ये फक् । कङ्किलायन तद्गोत्रापत्ये पुंस्त्री०

**किङ्किणी** स्त्री किङ्किणी+पृषो०इत्त्वम् । १क्षुद्रघण्टिकायाम् अम० । तदाकारफले २विकङ्कतवृक्षे राजनि० "रथेन काञ्चनाङ्गेन कल्पितेन यथाविधि । शैव्यसुग्रीवयुक्तेन किङ्किणीजालमालिना:" भा०आ०२२०अ० "सौभाग्यं महदाप्नोति किङ्किणीं प्रददद्धरेः" विष्णु ध०पु० "भग्नं भीमेन मरुता भवतोरथकेतनम् । पातितं किङ्किणीजालम्" वेणी० । ३अम्लरसायां द्राक्षायां "रुद्रधरः जलजम्बूवृक्षे हलायुधः "कट्फलं किङ्किणी द्राक्षा लकुचं मोचमेव च" हारी०। किंशब्दः किण इव यस्यां स्तुतौ गौरा०ङीष् । तन्त्रसारोक्ते ५देवीस्तुतिभेदे सा च "किं किं दुःखं सकलजननि ! क्षीयते न स्मृतायाम्" इत्यादिस्तुतिः ।

**किङ्किणीका** स्त्री कण—शब्दे ईकन् प्रकृतेः किङ्किणादेशः । क्षुद्रघण्टिकायाम् । "तनुवाहु वाहः सशब्दचामीर किङ्किणीकः" कुमा० । अभूमिपालान् भोजान् स्वानातिष्ठत् किङ्किणीकिनः हरिव० ३८ । अस्य पुंस्त्वमपि "किङ्किणीकविभूषितान्"

**किङ्किणीकाश्रम** पुंन० भा० प्रसिद्धे तीर्थभेदे । "वैमानिक उपस्पृश्य किङ्किणीकाश्रमे तथा निवासेऽप्सरसां दिव्ये कामचारी महीयते" भा०अनु०२५अ० ।

**किङ्किर** पुंस्त्री किञ्चित् किरति वियोगिनं रागाय वा कृ—क । १भ्रमरे २कोकिले ३अश्वे च सारस्वतः स्त्रियां जातित्वात् ङीष् । ३कामे पु०४गजकुम्भे न०५रक्तवर्णे पु०६तद्वति त्रि०

**किङ्किरात** पु० किङ्किरं रक्तवर्णमतति अत—अण् । अशोकवृक्षे जटा०भरनमितशिरः"शेखरैः किङ्किरातैः" रत्ना० ।

**किङ्किराल** पु० किङ्किराय रक्ततायै अलति काय्यांशोति अल—अच् २त० । वर्वूरे वैद्य० तस्य निर्यासयोगेन रक्तवर्णस्थिरत्वकरणात् तस्य तथात्वम् ।

**किङ्किरिन्** पु० किङ्कर+इनि । (वइचि)विकङ्कतवृक्षे जटा०

**किङ्किल** अव्य० किम्+किल+द्वन्द्वः । "किङ्किलेति कोपाश्रद्धयोः"गणरत्नोक्ते १कोपे २अश्रद्धायाञ्च । "न मर्षये न श्रद्दधे किङ्किल भवान् वृषलं याजयेत्" भवत्कर्त्तृकं शूद्रयाजनं कोपविषयः अश्रद्धाविषयश्च । तदर्थक किङ्किलशब्दयोगे लिङ् ।

**किञ्च** अव्य० किञ्च च द्व० । १आरम्भे,२समुच्चये,३साकल्ये, ४सम्भावनायाञ्च मेदि० ५अवान्तरे जटा०

**किञ्चन** अव्य० किम्+चन मुग्ध० पदद्वयमित्यन्ये । १असाकल्ये,